JSUNIL TUTORIAL
A CBSE Coaching for Mathematics and Science

Sadhna Devi Vidyaith, Samastipur

# सङ्कलनात्मकं मूल्याङ्कनम् – I (2016-17)

## संस्कृतम् – सम्प्रेषणात्मकम्

## कक्षा – नवमी

**समय : होरात्रयम्** **पूर्णाङ्काः 90**

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।

खण्डः (क) अपठित-अवबोधनम् – **10 अङ्काः**

खण्डः (ख) रचनात्मक-कार्यम् – **15 अङ्काः**

खण्डः (ग) अनुप्रयुक्त-व्याकरणम् – **30 अङ्काः**

खण्डः (घ) पठित-अवबोधनम् – **35 अङ्काः**

(ii) सर्वे प्रश्नाः **अनिवार्याः।**

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क'

## अपठित-अवबोधनम् – ( 10 अङ्काः )

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।(2+2+4+2)** 10

भारतीयसंस्कृतिः कर्मसिद्धान्तं प्रतिपादयति। जीवाः कर्मवशात् विविधाः योनीः लभन्ते। मनुष्ययोनिं लब्ध्वा यदि कश्चित् जीवः धर्मार्थकामनया सामञ्जस्यं स्थापयित्वा जीवनं निर्वहति तदा सः पुनरागमनचक्रात् विमुक्तो भूत्वा मोक्षं लभते। विश्वस्य सर्वासु अपि संस्कृतिषु भारतीया संस्कृतिः प्राचीनतमा वर्तते। समन्वयात्मकस्वभावात् सहिष्णुताप्रकर्षत्वात् च अनन्तान् भीषणतमान् प्रहारान् सोढ्वा अपि एषा जीवति। भारतीया संस्कृतिः सर्वेषाम् देशानां जातीनां च कल्याणं कर्तुं सक्षमाऽस्ति।

I. **एकपदेन उत्तरत।**

(i) भारतीयसंस्कृतिः किम् प्रतिपादयति?

(ii) का संस्कृतिः प्राचीनतमा वर्तते?

II. **पूर्णवाक्येन उत्तरत।**

(i) कदा मनुष्यः पुनरागमनचक्रात् विमुक्तो भूत्वा मोक्षं लभते?

(ii) भारतीया संस्कृतिः किम् कर्तुं सक्षमाऽस्ति?

III. **यथानिर्देशम् उत्तरत –**

(i) लभन्ते इति क्रियायाः कर्तृपदम् किम्?

(अ) योनिः (ब) विविधाः

(स) कर्मवशात् (द) जीवाः

(ii) समर्था इति पदस्य अत्र किं पर्यायपदम्?

(अ) सर्वासु (ब) सहिष्णुता



Downloaded from: http://jsuniltutorial.weebly.com/ 

(स) सक्षमा (द) स्वभावा

(iii) 'तदा सः पुनरागमनचक्रात्' अत्र 'सः' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) मनुष्याय (ब) जीवाय

(स) मोक्षाय (द) विश्वाय

(iv) देशानां – अस्य पदस्य विशेषणं किम्?

(अ) भारतीया (ब) सर्वेषाम्

(स) संस्कृतिः (द) जातीनां

**IV.** **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।**

## खण्डः 'ख'

## रचनात्मक-कार्यम् – (15 अङ्काः)

2 **भवती राधा। भवत्याः अनुजा श्यामा। संस्कृतस्य प्रचार-प्रसारः विद्यालये भवेत् इति विषयं स्वीकृत्य लिखिते पत्रे रिक्तस्थानानि मञ्जूषातः प्रपूर्य पत्रं पुनः उत्तरपुस्तिकायां लिखत।(½ x 10)** 5

दिल्लीनगरम्

दिनाङ्कः ----

प्रिय श्यामे!

__(i)__,

अत्र सर्वं कुशलं _____(ii)_____। भगिनि, संस्कृतभाषा सर्वासां भाषाणां जननी अस्ति। संस्कृतस्य _(iii)__ प्रसारः तु अस्माकम् दायित्वमस्ति। श्रावणमासस्य पूर्णिमायां संस्कृतदिवसः ___(iv)___। भवती अपि स्वविद्यालये श्लोक-अन्त्याक्षरीम् __(v)__ संस्कृत- __(vi)__ च आयोजयतु, इत्थम् संस्कृतस्य प्रचारः __(vii)__। _(viii)__ संस्कृतं जयतु __(ix)__।

भवत्याः भगिनी

__(x)__

**मञ्जूषा**


| |
|---|
| आयोजयतु, तत्रास्तु, भविष्यति, मान्यते, शुभाशिषः, श्लोकप्रतियोगिताम्, भारतम्, जयतु, प्रचारः, राधा। |

3 **चित्रम् आधृत्य मञ्जूषापदानां-सहायतया संस्कृतेन पञ्चवाक्यानि लिखत।** 10

JSUNIL TUTORIAL



Downloaded from: http://jsuniltutorial.weebly.com/ 



मञ्जूषा

| |
|---|
| संगीतसमारोहः, मञ्चे, संगीतकाराः, ध्वनिविस्तारकयन्त्राणि, गायकः, सप्तजनाः, चित्रम्, वाद्ययन्त्राणि, ढोलकम्, वादकाः, सज्जितम्, सितारे, मधुरं, गीतम्, गायति, वादयति, पश्यति, अपि। |

अथवा

मञ्जूषायां प्रदत्तशब्दानां सहायतया 'पुस्तकालयः' इति विषयम् अधिकृत्य पञ्च वाक्यानि लिखत। 10

मञ्जूषा

पुस्तकानि, तूष्णीम्, छात्राः, समाचारपत्रम्, कुर्वन्ति आगच्छन्ति, अनेकानि, विषयाणाम्, ग्रन्थाः, ज्ञानवर्धनम्, अध्ययनम्, महत्त्वपूर्णं, पुस्तकालयः, पुस्तकालयाध्यक्षः, अत्र, पठन्ति, सन्ति।

खण्डः 'ग'

अनुप्रयुक्त व्याकरणम् – ( 30 अङ्काः )

4 अधोलिखितप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत – 4

(i) 'ह्' वर्णस्य किम् उच्चारणस्थानम् अस्ति?

(ii) 'गङ्गा' अत्र कः वर्णः नासिक्यः अपि अस्ति?

(iii) वर्णवियोजने उचितं वर्णं चित्वा रिक्तस्थानस्य पूर्तिं कुरुत।
वक्तव्यम् = व्+अ+क्+ __ +अ+व्+य्+अ+म्

(iv) उचितम् वर्णसंयोजनम् कुरुत।
प्+आ+र्+श्+व्+ए= ____________

5 अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं वा कृत्वा लिखत। 5

(i) यद्यपि वर्षा आसीत् तथापि अहं विद्यालयं गतवती।

(ii) अत्र विद्यालये अवकाशः नास्ति।

(iii) गीतायाम् उत्+लेखः अस्ति यत् अस्माकम् अधिकारः कर्मणि अस्ति न तु फले।

(iv) जगत्+ईशः सर्वान् रक्षतु।

(v) कोऽहम् वदतु साम्प्रतम्।



Downloaded from: http://jsuniltutorial.weebly.com/

6 प्रदत्तविकल्पेभ्यः उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत। 5

(i) ___ विद्यालयं गच्छन्ति।

(अ) बालकाः (ब) बालकौ
(स) बालकः (द) बालकम्

(ii) माता ___ भोजनं पचति।

(अ) साधूनाम् (ब) साधवः
(स) साधवे (द) साधुम्

(iii) जगति___ सदृशः कोऽपि न।

(अ) मात्रा (ब) माता
(स) मात्रो (द) मातृषु

(iv) ___ कवेः गीतं शृणोतु।

(अ) अस्य (ब) अस्याः
(स) अस्मिन् (द) अयम्

(v) सरोवरे ___ विकसन्ति।

(अ) कमलाः (ब) कमलानि
(स) कमलम् (द) कमलेषु

7 अधोलिखितविकल्पेभ्यः धातोः उचितं रूपं चित्वा रिक्तस्थानानि पूरयत। 5

(i) जितेन्द्रः सुखं समृद्धिं च ___________ ।

(अ) लप्स्यते (ब) लप्स्यसे
(स) लप्स्यन्ते (द) लप्स्यामहे

(ii) सुपुत्रः सदा पितरौ ___________ ।

(अ) सेविष्यन्ते (ब) सेविष्यते
(स) सेविष्ये (द) सेविष्येते

(iii) ह्यः रात्रौ अहं प्रातिवेशिकस्य गृहम् ___________ ।

(अ) अगच्छत् (ब) अगच्छन्
(स) अगच्छम् (द) अगच्छः

(iv) ग्रीष्मकाले भोजनं शीघ्रमेव ___________ ।

(अ) नश्यसि (ब) नश्यामि (स) नश्यन्ति (द) नश्यति

(v) किं त्वम् इत्थम् दुष्करं कार्यं कर्तुं ___________ ?

(अ) शक्नोषि (ब) शक्नोति (स) शक्नोमि (द) शक्नुमः

8 कोष्ठकगतशब्देषु उचितविभक्तिं प्रयुज्य वाक्यानि पूरयत। 5

(i) (विद्यालय)______ परितः वृक्षाः सन्ति।

(ii) (श्रीगुरु)______ नमः।

(iii) बालकः (सिंह) ______ बिभेति।

(iv) पुत्रः ______ (जनक) सह गच्छति।

(v) ______ (नगर) बहिः कूपः अस्ति।



Downloaded from: http://jsuniltutorial.weebly.com/ 

9 **रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत।** 6

(i) भ्राता आसने उप+विश्+ल्यप् दूरदर्शनं पश्यति।

(ii) अहं स्नात्वा खादामि।

(iii) ते स्नानं कर्तुं नदीं गच्छन्ति।

(iv) अहं धनं दत्त्वा पुस्तकानि क्रीणामि।

(v) सेवकः सभां प्र+विश्+ल्यप् राजानं नमति।

(vi) सः फलं कृत्+तुमुन् छुरिकाम् आनयति।

## खण्ड : 'घ'

## पठित-अवबोधनम् - 35 अङ्काः

10 **अधोलिखितम् गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।(2+1+2)** 5

अत्रान्तरे ब्राह्मणोऽपि श्राद्धं गृहीत्वा गृहम् उपावृत्तः। ब्राह्मणं दृष्ट्वा नकुलः रक्तविलिप्तमुखपादः तस्य चरणयोः अलुठत्। विप्रः तथाविधं तं दृष्ट्वा बालकोऽनेन खादितः इति अवधार्य कोपात् नकुलं व्यापादितवान्। अनन्तरं यावत् उपसृत्य अपत्यं पश्यति तावद् बालकः सुस्थः सर्पश्च व्यापादितः तिष्ठति। ततः तम् उपकारकं नकुलं मृतं निरीक्ष्य आत्मानं मुषितं मन्यमानः ब्राह्मणः परं विषादम् अगच्छत्।

I. **एकपदेन उत्तरत।**

(i) नकुलेन कः व्यापादितः?

(ii) रक्तविलिप्तमुखपादः नकुलः कृतज्ञतया कस्य चरणयोः अलुठत्?

II. **पूर्णवाक्येन उत्तरत।**

ब्राह्मणः नकुलं किमर्थम् व्यापादितवान्?

III. **उचितम् उत्तरम् चित्वा लिखत।**

(i) 'उपकारकम्' इति पदस्य विशेष्यपदम् अनुच्छेदे किम्?

(अ) ब्राह्मणं (ब) सर्पम्
(स) नकुलम् (द) बालकम्

(ii) 'समीपं गत्वा' इत्यर्थे गद्यांशे किम् पदमस्ति?

(अ) अवधार्य (ब) निरीक्ष्य
(स) गृहीत्वा (द) उपसृत्य

11 **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। (2+1+2)** 5

भवन्ति नम्रास्तरवः फलोद्गमैः, नवाम्बुभिर्भूरिविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः, स्वभाव एवैष परोपकारिणाम्।।

I. **एकपदेन उत्तरत।**

(i) मेघाः कैः भूरिविलम्बिनः भवन्ति?

(ii) तरवः फलोद्गमैः कीदृशाः भवन्ति?

II. **पूर्णवाक्येन उत्तरत।**

परोपकारिणां कः स्वभावः भवति?

III. **उचितम् उत्तरं चित्वा लिखत।**

(i) 'सत्पुरुषाः' इति विशेष्यपदस्य विशेषणपदं किमस्ति?



Downloaded from: http://jsuniltutorial.weebly.com/ 

(अ) घना: (ब) अनुद्धता:

(स) तरव: (द) नम्रा:

(ii) मेघा: अस्मिन् अर्थे किं पर्यायपदं श्लोके प्रयुक्तम्?

(अ) नम्रा: (ब) अम्बुभि:

(स) तरव: (द) घना:

12 **अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत।(2+1+2)** 5

राम: – वत्स लक्ष्मण! किमेवं भरत: प्राप्त:?

लक्ष्मण: – आर्य! अथ किम्?

सीता – आर्यपुत्र! किं भरत: आगत:?

राम: – मैथिलि! अथ किम्?

अद्य खल्ववगच्छामि पित्रा मे दुष्करं कृतम्।

कीदृशस्तनयस्नेहो भ्रातृस्नेहोऽयमीदृश:।

**I. एकपदेन उत्तरत।**

(i) 'मैथिली' का आसीत्?

(ii) 'पित्रा मे दुष्करं कृतम्' इति स्नेहभावेन क: वदति?

**II. पूर्णवाक्येन उत्तरत।**

राम: लक्ष्मणम् किम् अपृच्छत्?

**III. उचितम् उत्तरम् चित्वा लिखत।**

(i) 'पुत्र:' इत्यस्य किम् पर्यायपदम् पद्यांशे अस्ति?

(अ) आर्यपुत्र: (ब) वत्स:

(स) तनय: (द) आर्य:

(ii) अवगच्छामि इति क्रियापदस्य कर्तृपदं किम्?

(अ) राम: (ब) लक्ष्मणाय:

(स) एहम (द) त्वम

13 **अधोलिखितपंक्तीनाम् उचितं भावार्थं चित्वा उत्तरपुस्तिकायां लिखत।** 4

(i) ऐश्वर्यस्य विभूषणं सुजनता।

(क) वैभवस्य आभूषणम् सज्जनता अस्ति।

(ख) आभूषणस्य वैभवं सज्जनता अस्ति।

(ग) सज्जनताया: आभूषणम् वैभवम् अस्ति।

(ii) अविवेक: परमापदाम् पदम्।

(क) विवेकिता संकटानाम् स्थिति:।

(ख) विवेकशून्यता विपदाम् स्थिति:।

(ग) अविवेकिता परमं पदम्।

(iii) मार्गारब्धा: सर्वयत्ना: फलन्ति।

(क) मार्गे दैवयोगेन सर्वे यत्ना: फलन्ति।

(ख) ता: एव चेष्टा: फलदायिका: भवन्ति या: उचितमार्गे सोद्देश्यं प्रारभ्यन्ते।



Downloaded from: http://jsuniltutorial.weebly.com/ 

(ग) आरम्भे सर्वे यत्नाः मार्गे फलदायकाः भवन्ति।

(iv) न शोभते सभामध्ये हंसमध्ये बको यथा।

(क) विदुषाम् सभायाम् विद्याविहीनः जनः न शोभते।

(ख) विदुषाम् सभायाम् विद्वान् न शोभते।

(ग) हंसानाम् सभायाम् बकः न शोभते।

14 **निम्नलिखितश्लोकयोः अन्वयं मञ्जूषातः समुचितं पदं चित्वा पूरयत। (½ x8)** 4

I. पादोपभुक्ते तव पादुके मे एते प्रयच्छ प्रणताय मूर्ध्ना।
यावद् भवानेष्यति कार्यसिद्धिं तावद्भविष्याम्यनयोर्विधेयः ।।

**अन्वयः** - एते तव पादोपभुक्ते ___(i)___ मूर्ध्ना प्रणताय मे ___(ii)___ यावद् भवान् ___(iii)___ एष्यति तावद् अनयोः ___(iv)___ भविष्यामि।

II. गौरवं प्राप्यते दानात् न तु वित्तस्य सञ्चयात्।
स्थितिरुच्चैः पयोदानां पयोधीनामधः स्थितिः ।।

**अन्वयः** - दानात् ___(v)___ प्राप्यते वित्तस्य ___(vi)___ तु न। पयोदानाम् ___(vii)___ उच्चैः ___(viii)___ (च) स्थितिः अधः (भवति)।

**मञ्जूषा**

| |
|---|
| स्थितिः, पादुके, विधेयः, पयोधीनाम्, कार्यसिद्धिं, गौरवं, प्रयच्छ, सञ्चयात् |

15 **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।** 4

(i) वित्तस्य सञ्चयात् गौरवं न प्राप्यते।

(ii) भ्रातृवत्सलः भरतः आगतः।

(iii) आत्मा एव सत्।

(iv) राजा पण्डितसभां कारितवान्।

16 **घटनाक्रमानुसारम् अधोलिखितवाक्यानि क्रमेण पुनः लिखत।( ½ x 8)** 4

(i) अतः नृपः स्वपुत्रान् विष्णुशर्मणः करे समर्पितवान्। (vi)

(ii) सुदर्शनः पुत्राणाम् आचारहीनतया उद्विग्नः आसीत्। (ii)

(iii) नृपस्य पुत्राः अनधिगतशास्त्राः आचारहीनाः च आसन्। (iii)

(iv) विष्णुशर्मा राजकुमारान् शिक्षितवान्। (vii)

(v) अतः सः पण्डितसभां कारितवान्। (v)

(vi) विष्णुशर्मा पण्डितः तान् शिक्षयितुं अमन्यत। (vi)

(vii) महद्भिः सुप्रतिष्ठितः अश्मापि देवत्वं याति। (iv)

(viii) पाटलिपुत्रनगरे सुदर्शनः नाम राजा आसीत्। (i)

17 **(अ) अधोलिखितवाक्ययोः रेखांकितपदयोः कृते उचितम् अर्थं चित्वा लिखत।** 4

(i) अयं ते दयितो भ्राता भरतो भ्रातृवत्सलः।

(अ) दयाशीलः (ब) प्राप्तः (स) प्रियः (द) दाता

(ii) न्यग्रोधफलम् आहर।

(अ) चोरय (ब) आनय

(स) नय (द) आगच्छ

**(आ) शब्दानाम् अर्थैः सह मेलनं कुरुत।**

(i) पयोदानाम् - नेत्रम्

(ii) लोचनम् - दुःखम्

(iii) नक्तम् - मेघानाम्

(iv) विषादम् - रात्रौ

Downloaded from: http://jsuniltutorial.weebly.com/





-o0o0o0-